*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[12]**

1. कौरवाणां पाण्डवानां च मध्ये सङ्ग्रामः कुत्र अभवत्?
   (A) हस्तिनापुरे　(B) कुरुक्षेत्रे　(C) क्रीडाङ्गणे　(D) गृहे
   **उत्तर :** (B) कुरुक्षेत्रे
2. अमृततुल्याः उपदेशाः कस्याम् सन्ति?
   (A) कथायाम्　(B) पुस्तिकायाम्　(C) गीतायाम्　(D) शास्त्राणाम्
   **उत्तर :** (C) गीतायाम्
3. श्रीकृष्णः कम् कर्तव्यपालनार्थम् उपदिष्टवान्?
   (A) अर्जुनम्　(B) युधिष्ठिरम्　(C) दुर्योधनम्　(D) भीमम्
   **उत्तर:** (A) अर्जुनम्
4. कौरवाणां पाण्डवानां च मध्ये कुरुक्षेत्रे किं अभवत्?
   (A) स्नेहम्　(B) सन्धिम्　(C) सङ्ग्रामम्　(D) राजतिलकम्
   **उत्तर :** (C) सङ्ग्रामम्
5. गीतायाम् उपदेशाः कीदृशाः सन्ति?
   (A) अमृततुल्याः　(B) हानिकारकाः　(C) प्रबोधकाः　(D) प्रवंचिकाः
   **उत्तर:** (A) अमृततुल्याः
6. स्थितप्रज्ञ भवति -
   (A) आसक्ति मुक्तः　(B) भयः मुक्तः　(C) क्रोध मुक्तः　(D) उक्त सर्वाः
   **उत्तर :** (D) उक्त सर्वाः
7. क्रोधात् सम्मोहः भवति।
   (A) क्रोधात् विवेकः उत्पद्यते।　(B) क्रोधात् अविवेकः उत्पद्यते।
   (C) क्रोधात् धनम् उत्पद्यते।　(D) क्रोधात् धर्मम् उत्पद्यते।
   **उत्तर :** (B) क्रोधात् अविवेकः उत्पद्यते।
8. ज्ञानं लब्ध्वा किम् अधिगच्छति?
   (A) शान्तिम्　(B) लाभम्　(C) धनम्　(D) मुक्तिम्
   **उत्तर:** (A) शान्तिम्
9. तत्वदर्शिनः ज्ञानम् उपदेक्ष्यन्ति -
   (A) प्रणिपातेन　(B) परिप्रश्नेन　(C) सेवया　(D) उक्त सर्वाः
   **उत्तर :** (D) उक्त सर्वाः
10. बुद्धिनाशः भवति -
    (A) स्मृतिभ्रंशाद्　(B) स्मृतिविभ्रमात्　(C) सम्मोहात्　(D) क्रोधात्

**उत्तर:** (A) स्मृतिभ्रंशाद्

11. श्रद्धावान् लभते ज्ञानम्।

(A) श्रद्धालुः मनुष्य दिव्यज्ञानं प्राप्तुं प्रयासं करोति।
(B) मनुष्यः धनम् प्राप्तुं प्रयासं करोति।
(C) मनुष्यः पुण्यं प्राप्तुं प्रयासं करोति।
(D) मनुष्य दिव्यवाचम् प्राप्तुं प्रयासं करोति।

**उत्तर:** (A) श्रद्धालुः मनुष्य दिव्यज्ञानं प्राप्तुं प्रयासं करोति।

12. कार्यक्षेत्रे जीवनक्षेत्रे च कस्याः उपदेशाः अनुपालनीया?

(A) अध्यापिकायाः (B) भगिन्याः (C) मातायाः (D) गीतायाः

**उत्तर :** (D) गीतायाः

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[11]**

13. अनुद्वेगकरं सत्यं प्रियहितं च वाक्यं ____________ तपः उच्यते। (वाङ्मयं / स्थितधीः)

**उत्तर :** वाङ्मयं

14. सततं सन्तुष्टः दृढनिश्चयः च ____________ भवति। (योगी / वाङ्मयं)

**उत्तर :** योगी

15. अनुद्विग्नमनाः मुनिः ____________ उच्यते। (स्मृतिविभ्रमः / योगी)

**उत्तर :** स्थितधीः

16. तद् आत्मज्ञानं प्रणिपातेन परिप्रश्नेन ____________ च विद्धि। (सेवया / स्मृतिविभ्रमः)

**उत्तर :** सेवया

17. प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति ____________। (देवता / जन्तवः)

**उत्तर :** जन्तवः

18. सम्मोहात् ____________ भवति। (स्मृतिविभ्रमः / योगी)

**उत्तर :** स्मृतिविभ्रमः

19. हर्षामर्षभयोद्वेशै : ____________यः स च मे प्रिय। (मुक्तो / भुत्क्तो)

**उत्तर :** मुक्तो

20. उपदेक्ष्यन्ति ते ज्ञानं ____________ तत्त्वदर्शिनः। (ऋषिनः / ज्ञानिनः)

**उत्तर :** ज्ञानिनः

21. स्वाध्यायाभ्यसनं चैव ____________ उच्यते। ( वाङ्मयं तप / दैहिक तप)

**उत्तर :** वाङ्मयं तप

22. वीतराग भय क्रोधः स्थितधीः ____________ उच्यते। ( मुनिः / देवः)

**उत्तर :** मुनिः

23. श्रद्धावाँल्लभते ____________ तत्परः संयतेन्द्रियः। (ज्ञानम् / बुद्धिम)

**उत्तर :** ज्ञानम्

*** स्तम्भयोः मेलनं कुरुत।** **[8]**

| शब्दाः | अर्थाः |
|---|---|
| 24. मुनिः | (क) उपन्यासकः |
| 25. सुगीता | (ख) नमस्कारेण |
| 26. प्रणिपातेन | (ग) यतिः |
| 27. कथावाचकः | (घ) गानमयी |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. मुनिः | (ग) यतिः |
| 2. सुगीता | (घ) गानमयी |
| 3. प्रणिपातेन | (ख) नमस्कारेण |
| 4. कथावाचकः | (क) उपन्यासकः |

| शब्दाः | अर्थाः |
|---|---|
| 28. वाङ्मयम् | (क) मैत्रीपूर्णः |
| 29. यतात्मा | (ख) क्षमावान् |
| 30. मैत्रः | (ग) संयमी |
| 31. क्षमी | (घ) वाचिकम् |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. वाङ्मयम् | (घ) वाचिकम् |
| 2. यतात्मा | (ग) संयमी |
| 3. मैत्रः | (क) मैत्रीपूर्णः |
| 4. क्षमी | (ख) क्षमावान् |

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[15]**

32. बुद्धेः नाशात् मनुष्यः किं प्राप्नोति?

**उत्तर :** विनाशं

33. रमेशः कम् प्रश्नम् अपृच्छत्?

**उत्तर :** पितरम्

34. अर्जुनाय गीतां कः उपदिष्टवान्?

**उत्तर :** श्रीकृष्णः

35. कस्मात् सम्मोहः जायते?

**उत्तर :** क्रोधात्

36. मनुष्य आपत्कालेषु किम् न अनुभवति?

**उत्तर :** उद्वेगं

37. श्रद्धावान् जनः किं लभते?

**उत्तर :** ज्ञानम्

38. श्रद्धावान् जनः किं लभते?

**उत्तर :** ज्ञानम्

39. स्मृति भ्रंशात् का नश्यति?

**उत्तर :** बुद्धिः

40. हर्षामर्षभयोद्वेगैः मुक्तः नरः कस्य प्रियः भवति?

**उत्तर :** भगवतः/मम (श्रीकृष्णस्य)

41. अर्जुनं कः उपदिशति?

**उत्तर :** श्रीकृष्णः

42. ईश्वरः प्रियभक्तः कः भवति?

**उत्तर :** योगी

43. मनुष्यः कस्मात् सम्मोहः प्राप्नोति?

**उत्तर :** क्रोधात्

44. गीता जयन्ती महोत्सवे रमेशः केन सह गतवान्?

**उत्तर :** स्वजनकेन

45. श्रीगीता-जयन्ती महोत्सवः कुत्र आचरितः?

**उत्तर :** कुरुक्षेत्रे

46. सम्मोहात् किं जायते?

**उत्तर :** स्मृतिविभ्रमः

*** पूर्णवाक्येन उत्तरं लिखत। [24]**

47. कीदृशः जनः स्थितधीः उच्यते?

**उत्तर :** यः जन दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः मुक्तः सैव जनः स्थितधीः उच्यते।

48. कीदृशं वाक्यं वाङ्मयं तपः उच्यते?

**उत्तर :** अनुद्वेगकरं, सत्यं, प्रियहितं च वाक्यं वाङ्मयं तपः उच्यते।

49. जनः कथं प्रणश्यति?

**उत्तर :** जनः सम्मोहात्, स्मृतिभ्रंशात्, बुद्धिनाशात् च प्रणश्यति।

50. जनः कथम् उत्तमां शान्तिं प्राप्नोति?

**उत्तर :** श्रद्धया, तत्परत्वेन, संयमेन ज्ञानं लब्ध्वा उत्तमां शान्तिं प्राप्नोति।

51. श्रीकृष्णः किमर्थम् अर्जुनम् उपदिष्टवान्?

**उत्तर :** श्रीकृष्णः युद्धपराङ्मुखम् अर्जुनं कर्त्तव्यपालनार्थम् उपदिष्टवान्।

52. सम्यक् रूपेण किं करणीयः?

**उत्तर :** गीतायाः अभ्यासः सम्यक् रूपेण करणीयः।

53. के यथार्थज्ञानिनः भवन्ति?

**उत्तर :** ये सत्यस्य दर्शनं कृतवन्तः ते एव यथार्थज्ञानिनः भवन्ति।

54. वाचिकं तपः कः कथ्यते?

**उत्तर :** शास्त्रादीनां स्वाध्यायः, तेषाम् अभ्यासः च वाचिकं तपः कथ्यते।

55. अर्जुनः युद्धे कान् दृष्ट्वा युद्धं कर्तुं न इच्छति स्म?

**उत्तर :** अर्जुनः युद्धे स्वबान्धवान् दृष्ट्वा युद्धं कर्तुं न इच्छति स्म।

56. उपदेशप्राप्तये त्रयः उपायाः के भवन्ति?

**उत्तर :** उपदेशप्राप्तये त्रयः उपायाः प्रणिपातेन परिप्रश्नेन सेवया च भवन्ति।

57. दिव्यं ज्ञानं प्राप्य मनुष्यः किं प्राप्नोति?

**उत्तर :** दिव्यं ज्ञानं प्राप्य मनुष्यः जीवने अनन्तम् आनन्दं प्राप्नोति।

58. यदा अधिकः व्यामोहः भवति तदा किं भवति?

**उत्तर :** यदा अधिकः व्यामोहः भवति तदा मनुष्यस्य स्मृतिः निष्क्रिया नष्टा च भवति।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[6]**

59. अस्मिन् पाठे वयं <u>श्रीमद्भगवद्गीतायाः</u> काँश्चन श्लोकान् पठामः।

**उत्तर :** अस्मिन् पाठे वयं **कस्याः** काँश्चन श्लोकान् पठामः?

60. <u>क्रोधात्</u> सम्मोहः भवति।

**उत्तर : कस्मात्** सम्मोहः भवति?

61. कुरुक्षेत्रे <u>कौरवावां पाण्डवानां च</u> मध्ये सङ्ग्रामः अभवत्।

**उत्तर :** कुरुक्षेत्रे **केषां** मध्ये सङ्ग्रामः अभवत्?

62. गीतायाम् <u>अमृततुल्याः</u> उपदेशाः सन्ति।

**उत्तर :** गीतायाम् **कीदृशाः** उपदेशाः सन्ति?

63. भगवान् श्रीकृष्णः <u>अर्जुनम्</u> उपदिशति।

**उत्तर :** भगवान् श्रीकृष्णः **कम्** उपदिशति?

64. <u>कथावाचकः</u> गीतायाः विषये वर्णयति स्म।

**उत्तर : कः** गीतायाः विषये वर्णयति स्म?

*** समुचितपदेन रिक्तस्थानानि पूरयत, येन कथनानां भावः स्पष्टः स्यात्।** **[6]**

65. यत् अनुद्वेगकरं, सत्यं (i) ____________ हितकरं च भाषणं स्यात्, तत् (ii) ____________ तपः इति कथ्यते। शास्त्रादीनां (iii) ____________ , तेषाम् अभ्यासः च वाचिकं (iv) ____________ कथ्यते।
[मञ्जूषा - वाङ्मयं, स्वाध्यायः, प्रियकरं, तपः]

**उत्तर :** (i) प्रियकरं (ii) वाङ्मयं (iii) स्वाध्यायः (iv) तपः

66. यस्मात् मनुष्यात् कोऽपि (i) ____________ प्राणी वा उद्विग्नः न भवति। यश्च मनुष्यः अन्यस्मात् (ii) ____________ प्राणिनः वा उद्विग्नः न भवति। यश्च हर्षेण, (iii) ____________ , भीत्या, चिन्तया च रहितः भवति। सः मम अतीव प्रियः (iv) ____________ भवति।
[मञ्जूषा - भक्तः, मनुष्यः, ईर्ष्याया, जनात्]

**उत्तर :** (i) मनुष्यः (ii) जनात् (iii) ईर्ष्यया (iv) भक्तः

*** अधोलिखितानां श्लोकानां भावार्थं हिन्दी भाषायां लिखत। [4]**

67. दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥

**उत्तर :** जो मनुष्य विपत्ति आने पर उद्वेग अर्थात् दुःख का अनुभव नहीं करता है। जो सुख प्राप्त होने पर भी लालसा अर्थात् इच्छा से रहित रहता है। जो वासना, भय और क्रोध इन सभी से मुक्त होता है, वह मौनी पुरुष स्थितप्रज्ञ अर्थात् स्थिर बुद्धि वाला मुनि कहलाता है।

68. सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥

**उत्तर :** हे अर्जुन! जो व्यक्ति हमेशा संतोषी रहता है। अर्थात् किसी भी वस्तु के अभाव से कभी भी असन्तुष्ट नहीं होता है। जो मन और इन्द्रियों को जीतकर नियंत्रित हो जाता है। अपनी बुद्धि से परमेश्वर के स्वरूप को स्थिर करता है। जो अपना मन और बुद्धि ईश्वर में समर्पित करता है। वह मनुष्य मेरा अत्यन्त प्रियतम भक्त होता है।

*** अधोलिखित पद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत। [63]**

69. कुरुक्षेत्रे श्रीगीता-जयन्ती-महोत्सवः आचरितः। तत्र बहवः जनाः अगच्छन्। रमेशः अपि स्वजनकेन सह तत्र गतवान्। कथावाचकः गीतायाः विषये वर्णयति स्म -
गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिः सृता॥
इदं श्रुत्वा रमेशः पितरम् अपृच्छत् - "पितः! गीता का? कथं सुगीता कर्तव्या?"
पिता-पुत्र! बहुभ्यः वर्षेभ्यः पूर्वं कुरुक्षेत्रे कौरवाणां पाण्डवानां च मध्ये सङ्ग्रामः अभवत् तस्मिन् युद्धे स्वबान्धवान् दृष्ट्वा अर्जुनः युद्धं कर्तुं न इच्छति स्म। तदा भगवान् श्रीकृष्णः युद्धपराङ्मुखम् अर्जुनं कर्तव्यपालनार्थम् उपदिष्टवान्। श्रीकृष्णस्य उपदेशः एव श्रीमद्भगवद्गीता अस्ति। गीतायाम् अमृततुल्याः उपदेशाः सन्ति।
रमेशः - तर्हि सुगीता कर्तव्या इत्यस्य कः आशयः?
पिता - अस्य आशयः अस्ति यत् गीतायाः अभ्यासः सम्यक् रूपेण करणीयः। गीता उत्तमभावेन पठितव्या। कार्यक्षेत्रे जीवनक्षेत्रे च गीतायाः उपदेशाः अनुपालनीयाः। अस्मिन् पाठे वयं श्रीमद्भगवद्गीतायाः काँश्चन श्लोकान् पठामः। वयं श्लोकान् मिलित्वा गायामः अपि।
I. एकपदेन उत्तरत -
(i) बहवः जनाः कुत्र अगच्छन्?
(ii) का सुगीता कर्तव्या?
II. पूर्णवाक्येन उत्तरत -
(i) कुरुक्षेत्रे सङ्ग्रामः कदा अभवत्?

(ii) सुगीता कर्तव्या इत्यस्य कः आशयः?

III. निर्देशानुसारम् उत्तरत -

(i) 'अस्मिन्' अत्र का विभक्तिः?

(अ) सप्तमी (ब) षष्ठी (स) पञ्चमी (द) चतुर्थी

(ii) कुरुक्षेत्रे सः युद्ध कर्तुं न इच्छति। अत्र 'सः' इति सर्वनाम पदं कस्मै प्रयुक्तम्?

(अ) भीमाय (ब) अर्जुनाय (स) श्रीकृष्णाय (द) युधिष्ठिराय

(iii) 'विषम्' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(अ) पालनम् (ब) युद्ध (स) अमृतं (द) उपदेशं

**उत्तर :** I. (i) श्रीगीताजयन्ती महोत्सवे

(ii) गीता

II. (i) कुरुक्षेत्रे सङ्ग्रामः बहुभ्यः वर्षेभ्यः पूर्व अभवत्।

(ii) अस्य आशयः अस्ति यत् गीतायाः अभ्यासः सम्यरूपेण करणीयः।

III. (i) (अ) सप्तमी

(ii) (ब) अर्जुनाय

(iii) (स) अमृतं

70. दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥

I. एकपदेन उत्तरत -

(i) जनाः केषु अनुद्विग्नमनाः भवति?

(ii) जनाः केषु विगतस्पृहः भवति?

II. पूर्णवाक्येन उत्तरत -

(i) मौनी पुरुषः कीदृशः भवति?

(ii) सुख प्राप्तये अपि मौनी मनुष्यः कीदृशः भवति?

III. निर्देशानुसारम् उत्तरत -

(i) 'बुद्धिः' इति पदस्य समानार्थक पदं श्लोके किं प्रयुक्तम्?

(अ) धीः (ब) क्रोधः (स) भयः (द) रागः

(ii) 'दुःखेषु' इति पदस्य विलोमपदं श्लोके किं प्रयुक्तम्?

(अ) जनेषु (ब) प्रज्ञेषु (स) सुखेषु (द) क्रोधेषु

(iii) 'मुनिः स्थितधी उच्यते।' वाक्येऽस्मिन् क्रियापदं किम्?

(अ) स्थितधीः (ब) उच्यते (स) मुनिः (द) इति

**उत्तर :** I. (i) दुःखेषु

(ii) सुखेषु

II. (i) वीत-राग-भय-क्रोधः इत्येभ्यः मुक्तः मौनी पुरुषः भवति।

(ii) सुख प्राप्तये अपि मौनी मनुष्यः निस्पृहः भवति।

III. (i) (अ) धीः

(ii) (स) सुखेषु

(iii) (ब) उच्यते

71. श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

I. एकपदेन उत्तरत -

(i) ज्ञानम् कः लभते?
(ii) संयतेन्द्रियः किं प्राप्नोति?
II. पूर्णवाक्येन उत्तरत -
(i) ज्ञानं लब्धवा सः किम् अधिगच्छति?
(ii) कीदृशं पुरुषः ज्ञानं लभते?
III. निर्देशानुसारम् उत्तरत -
(i) 'अज्ञानम्' इत्यस्य विलोमपदं श्लोके किं प्रयुक्तम्?
(अ) ज्ञानम् (ब) तत्परं (स) शान्ति (द) लभते
(ii) 'इन्द्रियसंयमी' इति पदस्य समानार्थकं श्लोके किम् प्रयुक्तम्?
(अ) पराम् (ब) लभते (स) संयतेन्द्रिय (द) अधिगच्छति
(iii) "श्रद्धावान् लभते ज्ञानम्।" वाक्येऽस्मिन् क्रियापदं किम्?
(अ) श्रद्धावान् (ब) लभते (स) ज्ञानम् (द) कोऽपि न

**उत्तर :** I. (i) श्रद्धावान्
(ii) ज्ञानम्
II. (i) ज्ञानं लब्धवा सः परां शान्तिम् अचिरेण अधिगच्छति।
(ii) संयतेन्द्रियः तत्परः श्रद्धावान् पुरुषः ज्ञानं लभते।
III. (i) (अ) ज्ञानम्
(ii) (स) संयतेन्द्रिय
(iii) (ब) लभते।

72. क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥
I. एकपदेन उत्तरत -
(i) सम्मोहात् किं भवति?
(ii) जनः कस्मात् प्रणश्यति?
II. पूर्णवाक्येन उत्तरत -
(i) सम्मोहः कस्मात् भवति?
(ii) कस्मात् बुद्धिनाशः भवति?
III. निर्देशानुसारम् उत्तरत -
(i) 'मति' इति पदस्य पर्यायपदं श्लोके किं प्रयुक्तम्?
(अ) बुद्धिः (ब) क्रोधः (स) सम्मोहः (द) नाशः
(ii) “क्रोधात् भवति सम्मोहः" वाक्येऽस्मिन् क्रियापदं किम्?
(अ) सम्मोहः (ब) भवति (स) क्रोधात् (द) कोऽपि न
(iii) 'क्रोधात्' पदै का विभक्तिः?
(अ) प्रथमा (ब) तृतीया (स) चतुर्थी (द) पञ्चमी

**उत्तर :** I. (i) स्मृति विभ्रमः
(ii) बुद्धिनाशात्
II. (i) सम्मोहः क्रोधात् भवति।
(ii) स्मृतिभ्रंशात् बुद्धिनाशः भवति।
III. (i) (अ) बुद्धिः

(ii) (ब) भवति

(iii) (द) पञ्चमी

73. सन्तुष्टः सततं योगी यतात्मा दृढ़निश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥

I. एकपदेन उत्तरत -

(i) दृढ़निश्चयी कः भवति?

(ii) कस्य मनोबुद्धिः मयि अर्पिता भवति?

II. पूर्णवाक्येन उत्तरत -

(i) सन्तुष्टः योगी कीदृशः भवति?

(ii) भगवतः प्रियः भक्तः कः वर्तते?

III. निर्देशानुसारम् उत्तरत -

(i) 'निरन्तरम्' इत्यस्य समानार्थक पदं श्लोके किम् प्रयुक्तम्?

(अ) प्रिय (ब) सततं (स) योगी (द) भक्तः

(ii) 'अप्रियः' इत्यस्य विलोमपदं श्लोके किं प्रयुक्तम्?

(अ) सततं (ब) निश्चय (स) प्रिय (द) मयि

(iii) 'स मे प्रियः मद्भक्तः भवति।' वाक्येऽस्मिन् कर्ता पदं किम्?

(अ) स (ब) मे (स) प्रियः (द) मद्

**उत्तर :** I. (i) योगी

(ii) भक्तस्य

II. (i) सन्तुष्टः योगी यतात्मा दृढ़निश्चयी भवति।

(ii) सन्तुष्टः यतात्मा दृढ़निश्चयः ईश्वरे अर्पितमनोबुद्धिः योगीभक्तः भगवतः प्रियः वर्तते ।

III. (i) (ब) सततं

(ii) (स) प्रियः

(iii) (अ) स

74. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥

I. एकपदेन उत्तरत -

(i) सत्यं वाक्यं कीदृशं अस्ति?

(ii) स्वाध्यायाभ्यासनेन किं वर्तते?

II. पूर्णवाक्येन उत्तरत -

(i) अनुद्वेगकरं वाक्यं कीदृशं वर्तते?

(ii) केषाम् स्वाध्यायाभ्यासनम् कथ्यते?

III. निर्देशानुसारम् उत्तरत -

(i) 'वाचिकम्' इत्यस्य समानार्थक पदं श्लोके किं प्रयुक्तम्?

(अ) वाङ्मयम् (ब) यत् (स) सत्यम् (द) प्रियहितम्

(ii) 'अहितम्' इत्यस्य विलोमपदं श्लोके किम् ?

(अ) वाचिकम् (ब) हितम् (स) भाषणम् (द) असत्यम्

(iii) 'स्वाध्यायाभ्यसनं च एव वाङ्मयं तप उच्यते' वाक्येऽस्मिन् क्रियापदं किम्?

(अ) स्वाध्याय (ब) अभ्यासनम् (स) उच्यते (द) तपः

**उत्तर :** I. (i) अनुद्वेगकरं

(ii) तपः

II. (i) अनुद्वेगकरं वाक्ये सत्यं प्रियहितं च वर्तते ।

(ii) शास्त्राणां नियमित अध्ययनं स्वाध्यायाभ्यसनम् इति कथ्यते ।

III. (i) (अ) वाङ्मयम्

(ii) (ब) हितम्

(iii) (स) उच्यते

75. यस्मान्नोद्विजते लोकः लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥

I. एकपदेन उत्तरत -

(i) कः लोकात् न उद्विजतेः?

(ii) भगवद्प्रिय कस्मात् न उद्विजते?

II. पूर्णवाक्येन उत्तरत -

(i) के चत्वारः भावाः अत्र निर्दिष्टाः येभ्यः मुक्तिः वर्णिता?

(ii) कः भगवतः प्रियः भक्तः भवति?

III. निर्देशानुसारम् उत्तरत -

(i) 'अभय' पदस्य विलोमपदं श्लोके किं प्रयुक्तम्?

(अ) भक्तः (ब) भय (स) प्रिय (द) उद्विजते

(ii) 'संसारः' इति पदस्य समानार्थक पदं श्लोके किम्?

(अ) लोकः (ब) हर्ष (स) अमर्ष (द) मुक्तः

(iii) 'सः च मे प्रियः अस्ति' वाक्येऽस्मिन् सर्वनाम पदम् किम्?

(अ) प्रियः (ब) च (स) सः (द) अस्ति

**उत्तर :** I. (i) भक्तः

(ii) लोकात्

II. (i) हर्षः, अमर्षः (क्रोध/ईर्ष्या), भयम्, उद्वेगः (चिन्ता)।

(ii) यस्मात् लोकाः न उद्विजते, यः च लोकात् न उद्विजते, हर्ष-अमर्ष-भय-उद्वेगैः मुक्तः सः भगवतः प्रियः भक्तः भवति।

III. (i) (ब) भय

(ii) (अ) लोकः

(iii) (स) सः

76. अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥

I. एकपदेन उत्तरत -

(i) सर्वभूतानां कीदृशं भावं न भवेयुः?

(ii) सर्वभूतानां कीदृशं भावं भवेयुः?

II. पूर्णवाक्येन उत्तरत -

(i) कीदृशः पुरुषः भगवतः अत्यन्त प्रियः भक्तः भवति?

(ii) धैर्यशाली कीदृश वर्तते?

III. निर्देशानुसारम् उत्तरत -

(i) 'गर्वहीनः' इत्यस्य समानार्थक पदं श्लोके किं प्रयुक्तम्?

(अ) निरहङ्कारः (ब) मैत्रः (स) करुणः (द) क्षमी
(ii) 'शत्रुः' इति पदस्य विलोम पदं श्लोके किम्?
(अ) मैत्रः (ब) सुखः (स) दुःख (द) निर्ममः
(iii) यः सर्वभूतानां अद्वेष्टा मैत्रः वर्तते । वाक्ये कर्ता पदम् अस्ति -
(अ) यः (ब) सर्वभूतानाम् (स) अद्वेष्टा (द) मैत्रः

**उत्तर :** I. (i) द्वेष्टाभाव
(ii) मैत्रः करुणाभाव च
II. (i) ममत्वरहितः, अहङ्कारविहीनः, सुखदुःखेषु समभावयुतः क्षमाशीलः च पुरुषः भगवतः अत्यन्त प्रियः भक्तः भवति ।
(ii) धैर्यशाली सुख दुख समवर्तते ।
III. (i) (अ) निरहङ्कारः
(ii) (अ) मैत्रः
(iii) (अ) यः

77. तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥
I. एकपदेन उत्तरत -
(i) ज्ञानिनः किं उपदेक्ष्यन्ति?
(ii) कीदृशः गुरुः ज्ञानं प्रदास्यति?
II. पूर्णवाक्येन उत्तरत -
(i) कः भवते ज्ञानं प्रदास्यति?
(ii) गुरुणां ज्ञानं कथं विद्धि?
III. निर्देशानुसारम् उत्तरत -
(i) "अज्ञानम्" इत्यस्य विलोमपदं श्लोके किं प्रयुक्तम्?
(अ) तद् (ब) ज्ञानम् (स) विद्धि (द) सेवया
(ii) "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिन" वाक्येऽस्मिन् सर्वनामपदं किम्?
(अ) ते (ब) ज्ञानिनः (स) ज्ञानम् (द) तत्त्वदर्शिनः
(iii) 'नमस्कारेण' इत्यस्य समानार्थक पदं श्लोके किं प्रयुक्तम्?
(अ) परिप्रश्नेन (ब) ज्ञानं (स) प्रणिपातेन (द) सेवया

**उत्तर :** I. (i) यथार्थज्ञानम्
(ii) तत्वदर्शिनः
II. (i) तत्त्वदर्शिनः गुरुः भवते ज्ञानं प्रदास्यति।
(ii) गुरुणां ज्ञानं प्रणिपातेन परिप्रश्नेन सेवया विद्धि।
III. (i) (ब) ज्ञानम्
(ii) (अ) ते
(iii) (स) प्रणिपातेन

----- -----